श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री निगमान्तमहादेशिकैः अनुगृहीतं

# ॥ श्री हयग्रीवस्तोत्रम् ॥

(शतदूषणीस्थ)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शतदूषणीस्थ-श्री हयग्रीवस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरि विततिर्बोधजलधेः।
कथादर्पक्षुभ्यत्कथककुल कोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदन हेषा हलहलः॥ १॥

हयग्रीवसुधासिन्धुहर्षहेषारवोर्मयः।
जयन्ति वादवेलान्तक्षिप्तबाह्यकुदृष्टयः॥ २॥

संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ
शान्तावद्यं स्तिमितबहुलानन्दसन्दोहमन्तः।
यत्तद्ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं
सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम्॥ ३॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः
प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे।
स एषामाहर्ता दनुजमथनो वाजिवदनः
स मे देवः श्रीमान् विदलयतु सम्मोहमखिलम्॥ ४॥

अबाधादध्यक्षप्रभृति मितिवर्गेष्ववधृतं
शरीरं यस्येदं जगदखिलमन्तर्यमयितुः।
स मे तर्कैरेतैर्निजविभवलुण्टाकमथनैः
प्रसीदत्वासीदन्निगमशतसीमा हयमुखः॥ ५॥

अज्ञानसन्तमससमाश्रयणोन्मुखानां
संवित्प्रदीपमहसा सहसा निरुन्धन्।

विद्यास्वयंवरपतिर्व्यपहन्त्वविद्यां
सर्वानुभूः स भगवान् पुरुषोत्तमो नः॥ ६ ॥

विदितमनुवदन्तो विश्वमेतद्यथावत्
विदधति निगमान्ताः केवलं यन्मयत्वम्।
अविदितबहुभूमा नित्यमन्तर्विधत्तां
हयवरवदनोसौ सन्निधिः सन्निधिं नः॥ ७ ॥

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितैः
उपदिशति यस्तथ्यं पथ्यं सतामवसीदताम्।
जननपदवीयातायातश्रमापहरां धियं
जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः॥ ८ ॥

नमस्त्रेधा विभक्तानामात्मनामन्तरात्मने।
ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे॥ ९ ॥

य एको दुर्लङ्घ्यत्रिगुणनिजमायानिगलितैः
विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा
दयालुर्देवोसौ तुरगवदनस्तारयतु नः॥ १० ॥

अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषाम्
अविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं
हताशेषावद्यं हयवदनमीडीमहि महः॥ ११ ॥

हताशेषक्लेशा निरवधि महानन्दधनिनो
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः।
अनाघ्रातद्वन्द्वा हयमुखपदद्वन्द्वरुचयः
स्वदन्तां मे सन्तः श्रुतिजलधिमुष्टिन्धयधियः॥ १२ ॥

॥ इति शतदूषणीस्थ-श्री हयग्रीवस्तोत्रं सम्पूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥